दैनिकं ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ताः

**पञ्चाङ्गम्**
अद्य सिद्धार्थी वि.सं. २०८२,
कलियुगाब्धः ५१२७ शरद-ऋतुः
सूर्यः दक्षिणायनम् मार्गशीर्षकृष्णसप्तमी
कार्तिक २६ प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-4 ■ वर्ष-5 ■ अङ्क-20 | 1 | नवम्बर, 11 2025 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 केन्द्रीय गृहमन्त्री एवं सहकारिता-मन्त्री अमित शाहः पञ्चविंशत्यधिक-द्विसहस्रतमस्य सहकारी-कुम्भस्य उद्घाटनं अकरोत्

3 हिमाचलप्रदेशे आपदाप्रभावितेभ्यः अधुना ₹८ लक्षरुप्यकाणि, ४,९१४ जनेभ्यः ₹८१ कोटिरूप्यकाणि दत्तानि

4 अन्तर्राष्ट्रीयश्रीरेणुकाजीमे लापके प्रवर्तिता नूतना परम्परा

# Delhi blast देहल्यां रक्तदुर्ग-मेट्रोस्थानकस्य प्रथमक्रमाङ्कस्य समीपे कारविस्फोटे ०८ जनाः मृताः



**हिमसंस्कृतवार्ताः – नवदेहली।** सोमवासरे सायं रक्तदुर्ग-मेट्रोस्थानकस्य प्रथमक्रमाङ्कस्य समीपे कारविस्फोटेन व्यापकः आतङ्कः उत्पन्नः। विस्फोटस्य बलम् एतावत् तीव्रम् आसीत् यत् कारयानस्य एकः भागः रक्तदुर्गस्य समीपे स्थिते रक्तमन्दिरस्य उपरि अवतरत् । मन्दिरस्य काचः भग्नः अभवत्, समीपस्थानां कतिपयानां आपणानां द्वाराणि, वातायनानि च क्षतिग्रस्तानि अभवन् । अस्यां घटनायां अनेके जनाः घातिताः इति सूचनाः प्राप्ताः। विस्फोटस्य अनन्तरं तत्क्षणमेव समीपस्थेषु आपणेषु अग्निप्रकोपः अभवत् । चान्दनीचौकस्य भागीरथप्रासादक्षेत्रपर्यन्तं कम्पः अनुभूतः, आपणिकाः च परस्परं आहूय स्थितिं पृच्छन्तः दृश्यन्ते स्म अनेकानि बसयानानि अन्यानि च वाहनानि अपि अग्निना प्रज्वलिताः इति सूचनाः प्राप्ताः ।

अग्निशामकविभागाय सायंकाले कारविस्फोटस्य विषये दूरवाणी प्राप्ता। तत्क्षणमेव षट् एम्बुलेन्सयानानि, सप्त अग्निशामकवाहनानि च घटनास्थले प्रेषिताणि । आश्रय-उद्धार-कार्यं प्रचलति, अग्नि-नियन्त्रणार्थं च प्रयत्नाः प्रचलन्ति। विस्फोटस्य कारणम् अद्यापि अज्ञातम् अस्ति। पुलिसैः क्षेत्रस्य परिक्रमणं कृतम् अस्ति, अन्वेषणसंस्थाः च घटनास्थले प्रमाणानि सङ्गृह्णन्ति। प्रारम्भिकसमाचाराः सूचयन्ति यत् एषः विस्फोटः कारमध्ये अभवत्, परन्तु तस्य स्वरूपं कारणं च अद्यापि अस्पष्टम् अस्ति । घटनायाः अनन्तरं सम्पूर्णे रक्तदुर्गे, चान्दनीचौकक्षेत्रे सुरक्षावर्धनं कृतम् अस्ति।

## राष्ट्रपतिपदासीना द्रौपदी मुर्मुः अङ्गोला-देशस्य सांसदान् सम्बोधितवती



**हिमसंस्कृतवार्ताः** - राष्ट्रपतिपदासीना द्रौपदी मुर्मुः लुआण्डा-नगरे स्थितायां राष्ट्रिय सभायां अङ्गोला-देशस्य सांसदान् सम्बोधितवती । राष्ट्रपतिना कथितम् आसीत् यत् विश्वस्य बृहत्तम-लोकतान्त्रिक-देशत्वेन, भारतेन अङ्गोलादेशेन सह संसदीय-सहयोगस्य संवर्धनं आशास्यते। सा लोकतान्त्रिक-संस्थानां पारस्परिक-आदान-प्रदान-माध्यमेन परस्परानुभव-माध्यमेन च अधिगमाय बलं प्रायच्छत्। अत्रावसरे राष्ट्रपतिः मुर्मुः अङ्गोला-देशे स्थितैः भारतीय समुदायस्य सदस्यैः सह अपि वार्तालापं साधयिष्यति । श्री मुर्मुः स्वकीयेन अङ्गोला-देशस्य समकक्षेण जोआओ-लौरेंसो इत्यमुना सह व्यापक- चर्चा कृतवती। उभावपि नेतारौ द्विपक्षीय-सहयोगं दृढीकर्तुं मिलित्वा कार्य सम्पादयितुं च सहमतिं प्रकटितवन्तौ । ध्यातव्यं वर्तते यत् राष्ट्रपतिः नवम्बर-मासस्य अष्टम-दिनाङ्कात् त्रयोदश-दिनाङ्क यावत् अङ्गोला-बोत्सवाना-देशयोः यात्रायां अस्ति।

## भारतेन एकपञ्चाशत्-सहस्राधिक-एकलक्ष-कोटिरूप्यकाणां रक्षोत्पादनं स्वायत्तीकृतम् - रक्षामन्त्री राजनाथसिंहः



**हिमसंस्कृतवार्ताः** - रक्षामन्त्रिणा राजनाथसिंहेन प्रोक्तं यत् भारतेन द्विसहस्रतमस्य चतुर्विंशे पञ्चविंशे च वर्षे प्रायः एकपञ्चाशत्-सहस्राधिक-एकलक्ष-कोटिरूप्यकाणां रक्षोत्पादनं स्वायत्तीकृतम्, एतस्मिन् तावत् रक्षा-सार्वजनिक-क्षेत्रोपक्रमाणां आहत्य एकसप्तति-दशमलव षड्-प्रतिशतं योगदानं वर्तते। मन्त्रिणा तावत् नवदिल्लीस्थे विश्व-व्यापार-केन्द्रे अत्याधुनिक केन्द्रीय-सौविध्यस्य रक्षा-सार्वजनिक-क्षेत्रोपक्रम-भवनस्य उद्घाटनानन्तरं एतानि वक्तव्यानि प्रदत्तानि । तेन एतदपि प्रोक्तं यत् रक्षा-निर्यातेन पञ्चनवत्यधिक षड्शतोत्तर-षड्सहस्र-कोटिरूप्यकाणां स्तरः संस्पृष्टः, येन भारतस्य स्वदेशीय-प्रणाल्यां वैश्विकविश्वासः रेखाङ्कितो भवति। तेन प्रोक्तं यत् "मेड् इन् इंडिया" रक्षा-उत्पादैः वैश्विकं सम्मानं प्राप्नोति । रक्षामन्त्रिणा भारतस्य वैश्विक-रक्षा-केन्द्रत्वेन निर्माणार्थं स्वदेशीकरणस्य निर्यातस्य च संवर्धनाय आग्रहः कृतः ।

## सुभाषितम्

**यो ध्रुवाणि परित्यज्य, ह्यध्रुवाणि निषेवते।**
**ध्रुवाणि तस्य नश्यन्ति, ह्यध्रुवं नष्टमेव च।।**

अर्थात्- जो निश्चित वस्तुओं को त्यागकर अनिश्चित वस्तुओं का सेवन करता है, उसकी निश्चित वस्तुएं भी नष्ट हो जाती हैं तथा अनिश्चित तो नष्ट हैं ही।

दैनिकं ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य
एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily
Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message
saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## प्रधानमन्त्रिणा नरेन्द्रमोदिना कविनः गीतकारस्य च आंदे-श्री-वर्यस्य निधनमालक्ष्य शोकः प्रकटितः

**हिमसंस्कृतवार्ताः** - प्रधानमन्त्रिणा नरेन्द्रमोदिना तेलङ्गानाराज्यस्य कविनः गीतकारस्य च आंदे-श्री-वर्यस्य निधनमालक्ष्य शोकः व्यक्तीकृतः। सामाजिक सञ्चालीय-सन्देशे प्रधानमन्त्रिणा उक्तं यत् आंदे-श्री-वर्यस्य निधनेन देशस्य सांस्कृतिक-बौद्धिक परिदृश्ये गभीरं शून्यं समापतितम्। तेन प्रोक्तं यत् आंदे-श्री-वर्यस्य विचाराः तेलङ्गानाराज्यस्य आत्मानं प्रतिविम्बयन्तिः स च एकः महान् कविः चिन्तकश्च आसीत् । प्रधानमन्त्रिणा आंदे-श्री-वर्यस्य शोकाकुल-परिवारस्य सदस्येभ्यः प्रशंसकेभ्यश्च स्वीया संवेदना प्रकटिता ।

# केन्द्रीय गृहमन्त्री एवं सहकारिता-मन्त्री अमित शाहः

## पञ्चविंशत्यधिक-द्विसहस्रतमस्य सहकारी-कुम्भस्य उद्घाटनं अकरोत्



**हिमसंस्कृतवार्ताः** - केन्द्रीय-गृहमन्त्री एवं सहकारिता-मन्त्री अमित शाहः अवदत् यत् नगरीय-सहकारी-बैंकसंस्थाभिः यत्नशील-यूनां सहैव समाजस्य वञ्चित वर्गाणां सशक्तीकरणार्थं अग्रे आगन्तव्यम् । सः नवदेहल्यां नगरीय-सहकारी-ऋण-क्षेत्रे आयोजिते अन्ताराष्ट्रिय-सम्मेलने पञ्चविंशत्यधिक-द्विसहस्रतमस्य सहकारी-कुम्भस्य उद्घाटनं अकरोत्। अत्रावसरे श्रीशाहः अवदत् यत् राष्ट्रीय-नगरीय-सहकारी बैंक ऋण-समितयः लिमिटेड् सहैव नगरीय-सङ्घटनैः नैतिक-दिशानिर्देशाः प्रकाशितव्याः येषाम् आधारेण प्रत्येकं नगरीय-सहकारी बैंकः स्वस्य वित्तीय-आधाराय नूतनस्वरुपं प्रदद्यात् । सः प्रावोचत् यत् अस्योद्देश्यम् तावत् सहकारितां दृढीकृत्य समाजस्य वञ्चित-वर्गाणाम् उत्थानं वर्तते । अवसरेऽस्मिन् श्रीशाहेन अमूल-इफको-संस्थयोः कृते अन्ताराष्ट्रीय-सहकारी-गठबंधनस्य विश्व-श्रेण्याम् शीर्ष-स्थानद्वयोः प्राप्तये शुभकामना प्रकल्पिता ।

# जम्मू-कश्मीर-हरियाणा-आरक्षकैः एकस्मिन् संयुक्ताभियाने हरियाणा-राज्यस्य फरीदाबाद-नगरात् विस्फोटकानि, शस्त्राणि च अधिगृहीतानि, मुख्यारोपी च निगडितः



**हिमसंस्कृतवार्ताः** - जम्मू-कश्मीर-हरियाणा-आरक्षकाणां एकेन दलेन हरियाणा-राज्यस्य फरीदाबाद-नगरात् विस्फोटकानि, शस्त्राणि च अधिगृहीतानि । फरीदाबादस्य आरक्षकायुक्तः सतेन्द्रकुमारगुप्तः अद्य वार्ताहरान् सूचितवान् यत् हरियाणा-आरक्षकाणां जम्मू-कश्मीर-आरक्षकाणां च मध्ये प्रचलिते संयुक्त अभियाने एकः अभियुक्तः डॉ. मुजम्मिलः निगडितः । शस्त्राणां अधिग्रहणं तदा सञ्जातं यदा कतिपयेभ्यः दिनेभ्यः पूर्वम् आरक्षक-विभागेन उत्तर-प्रदेशस्य सहारनपुर-नगरात् एकः कश्मीरी-चिकित्सकः श्रीनगरे आतङ्कवादी-सङ्गठनस्य जैश-ए मोहम्मदस्यसमर्थने भित्तिपत्रस्थापनस्य आरोपे निगृहीतः ।

# हिमाचलप्रदेशे दशमीकक्षायाम् अनुत्तीर्णाः न भविष्यन्ति छात्राः, राज्यसर्वकारेण परिष्कारनीतिः नीतये अनुमोदिता

**हिमसंस्कृतवार्ताः- डॉ. पद्मनाभः,**

धर्मशाला।हिमाचलप्रदेशस्य दशमीकक्षायाः छात्राणां कृते एषा सुखदवार्ता अस्ति यत् राज्यसर्वकारेण विद्यालयशिक्षामण्डलस्य परिष्कारनीतिः (इम्प्रूवमेंट पॉलिसी) औपचारिकरूपेण अनुमोदिता। अस्य निर्णयस्य प्रवर्तनात् आरभ्य मार्च् २०२६ तमे वर्षे आयोज्यमानायां दशमीकक्षायाः परीक्षायां कश्चन अपि छात्रः न तु अनुत्तीर्णः भविष्यति, न च अनुपूरकं (कम्पार्टमेन्ट) आगच्छति।

**छात्रेषु शैक्षणिकायासः न्यूनतां यास्यति**

नवनीत्याः प्रवर्तनात् छात्राणां शैक्षणिकायासः न्यूनतां यास्यति, अध्ययनस्य च उत्कर्षाय अवसरः लप्स्यते। नवव्यवस्थायां शिक्षामण्डलं वर्षे द्विवारं परीक्षा करिष्यति- आद्या परीक्षा मार्चमासे, द्वितीया तु परिष्कारपरीक्षा जून-जुलैमासयोः भविष्यति। ये छात्राः मार्चमासे मुख्यपरीक्षायां असफलाः भविष्यन्ति, ते जून- जुलाईमासयोः द्वितीयम् अवसरं लप्स्यन्ते। एवं तेषां पूर्णं वर्षं न व्यर्थं गमिष्यति। “अनुत्तीर्णः” तथा “कम्पार्टमेण्ट” इति शब्दौ निष्कासितौ भविष्यतः नवनीत्यां “अनुत्तीर्णः” तथा “कम्पार्टमेण्ट” इति शब्दौ परित्यक्तौ भविष्यतः। एषा नीतिः प्रथमपदे दशमकक्षायाः छात्राणां कृते प्रवर्तयिष्यते। शिक्षाविभागः अधुना तामेव द्वादशकक्षायां प्रवर्तयितुं सम्भावनां परिशीलयति। शिक्षामण्डलस्य सचिवः डॉ. मेजर विशालः शर्मा इत्याख्यः उक्तवान् यत् परिष्कारनीतिः सर्वकारतः अनुमोदिता अस्ति। शीघ्रमेव अधिसूचना प्रकाशिताऽपि भविष्यति।

# "लौकिकन्यायकोशः"

## "अहिभुक्त्कैकवर्तन्यायः"

मादकद्रव्यस्य प्रभावेन मत्तः कश्चन नौकाम् अधिरूढः कोऽहमिति अञ्जसा ज्ञायताम् इति धिया स्वपादे एकां रज्जुं बद्धवान्। नौकाजनेन तद् दृष्ट्वा परिहासपूर्वकम् अन्यस्य पादे अपि रज्जुं बद्धा। नौका यदा तीरं प्राप्ता तदा प्रमत्तेन अन्यस्य पादे बद्धा रज्जुः दृष्टा। तेन झटिति "यस्य पादे रज्जुः बद्धा सोऽहमस्मि अहं सः अस्मि सोऽहमेव" इत्यादिशब्दैः आक्रोशः कृतः। अविद्याग्रस्तः स्वरूपं विस्मृत्य अन्येन तादात्म्यं प्राप्य तदेव अहमिति आक्रोशति। एवम् अज्ञानेन अन्यतादात्म्यं प्राप्तवतः विषये अयं न्यायः प्रवर्तते।

**डा. वर्षा प्रकाश टोणगांवकर**
**पुणे / महाराष्ट्रम्**

# बिहार-राज्ये अद्य विंशति-जनपदानां द्वाविंशत्युत्तरशतम् आसनेषु विधानसभा-निर्वाचनस्य द्वितीयान्तिम चरणाय मतदानं भविष्यति



**हिमसंस्कृतवार्ताः** - बिहार-राज्ये अद्य विंशति-जनपदानां द्वाविंशत्युत्तरशतम् आसनेषु विधानसभा निर्वाचनस्य द्वितीयान्तिम चरणाय मतदानं भविष्यति। स्वतन्त्र निष्पक्ष-शान्तिपूर्ण मतदानाय च भारत-निर्वाचनायोगेन सर्वेऽपि प्रबन्धनोपायाः प्रकल्पिताः । अस्मिन् चरणे भारत-नेपाल-सीम्नि संलग्नेषु निर्वाचन-क्षेत्रेषु सहैव सीमाञ्चल मगध-शाहाबाद-कोसी-मिथिलाञ्चलादिषु क्षेत्रेषु मतदानं भविष्यति। अस्मिन् मतदाने त्रि-दशमलव-सप्तकोट्यधिक मतदातारः षट्त्रिंशदधिकैशतं महिला-प्रत्याशिभिः सह द्व्याधिक-त्रयोदशशतं प्रत्याशिनां निर्वाचनभाग्यं निर्णेष्यन्ति। अधिकांशेषु निर्वाचन-क्षेत्रेषु एनडीए सहैव महागठबंधनस्य प्रत्याशिनां मध्ये साक्षात् प्रतिस्पर्धा वर्तते । मतदानं प्रातः सप्तवादनात् आरभ्य सायं षड्वादनं यावत् प्रचलिष्यति। यद्यपि सुरक्षा-कारणतः, सप्तसु विधानसभा-क्षेत्रेषु सहैव केषुचित् मतदान केन्द्रेषु च मतदानं तावत् सायं पञ्चवादने समाप्तिमेष्यति । मतदान-प्रक्रियायाः निरन्तरं पर्यवेक्षणं सुनिश्चेतुं सर्वेषु मतदान केन्द्रेषु वेबकास्टिंग-व्यवस्था कृता अस्ति।

# अत्याधुनिकं नियन्त्रण-केन्द्रं संस्थापितम् निर्वाचनायोगेन ।

निर्वाचनायोगेन सम्पूर्ण-निर्वाचन प्रक्रियायाः पर्यवेक्षणाय पटना-नगरे एकम् अत्याधुनिकं नियन्त्रण-केन्द्रं संस्थापितम् । पञ्चनवत्यधिक-पञ्चशतं मतदान केन्द्राणां प्रबन्धनं पूर्णतया महिलाभिः करिष्यते, सहैव एकविंशति-दिव्याङ्गजन-मतदान केन्द्राणां संचालनं दिव्याङ्ग-कर्मचारिभिः करिष्यते । एतदतिरिच्य षोडशाधिक-त्रिशतम् आदर्श-मतदान केन्द्राणि अपि स्थापयिष्यन्ते।

# हॉकी-इण्डिया इत्यनेन आगामि महिला-कनिष्ठ हॉकी-विश्वचषक-क्रीडायाः कृते विंशति-सदस्यात्मकस्य दलस्य घोषणा



**हिमसंस्कृतवार्ताः** - कनिष्ठ-महिला-हॉकी-क्रीडायां ज्योति सिंहः भारतीयदलस्य नेतृत्वं निरंतरं करिष्यति। हॉकी इण्डिया इत्यनेन अद्य आगामि एफ.आई.एच. महिला-कनिष्ठ हॉकी-विश्वचषक-क्रीडायाः कृते विंशति-सदस्यात्मकस्य दलस्य घोषणा कृता। एषा प्रतिस्पर्धा चिली-देशस्य सैटियागो-नगरे नवम्बर-मासस्य पञ्चविंशति-दिनाङ्कात् दिसम्बरमासस्य त्रयोदश-दिनाङ्कपर्यन्तं भविष्यति। विंशति-सदस्ययुते दले अष्टादश क्रीडकाः, द्वौ वैकल्पिकौ च स्तः। पूल-सी मध्ये जर्मनी, आयलैण्ड, नमीबिया इत्येतैः देशैः सह भारतं स्थितम् अस्ति। भारतीयदलस्य प्रशिक्षकः भूतपूर्वः हॉकी-क्रीडकः तुषार खाण्डकरः भविष्यति।

# हिमाचलप्रदेशे आपदाप्रभावितेभ्यः अधुना ₹८ लक्षरुप्यकाणि, ४,९१४ जनेभ्यः ₹८१ कोटिरूप्यकाणि दत्तानि




**हिमसंस्कृतवार्ताः- मण्डी।** हिमाचलप्रदेशस्य मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः सोमवासरे मण्डीनगरस्य ऐतिहासिकपड्डलभूमौ आयोजिते आपदाश्रयवितरणसमारोहे राज्यस्य जनानां कृते अनेकाः बृहत्घोषणाः अकरोत्। सः घोषितवान् यत् आपदाग्रस्तपरिवाराः अधुना सप्तलक्षरुप्यकाणां स्थाने ८ लक्षरुप्यकाणि प्रदास्यन्ते। सः वस्त्राणि, पात्राणा, शय्याः आदीनां च क्रयणार्थम् अतिरिक्तम् एकलक्षरुप्यकाणि अपि घोषितवान्। मण्डीनगरे ४,९१४ प्रभावितजनानाम् कृते ८१.२८ कोटिरूप्यकाणां आश्रयनिधिः वितरिता। मञ्चे २१ जनानां कृते अन्येषां वित्तकोषसंख्यासु च ऑनलाईनरूपेण आश्रयनिधिः स्थानान्तरिता।

## कार्यक्रमे भाजपादलस्य विधायकानामपि उपस्थितिः स्यात्

मुख्यमन्त्री सुक्खुः विपक्षं लक्ष्यं कृत्वा अवदत् यत् अस्मिन् कार्यक्रमे सर्वे भाजपाविधायकाः विपक्षनेता च जयराममठाकुरः उपस्थिताः स्युः , यतः आपदः कस्यापि दलस्य न भवन्ति। "आपदि राजनीतिः नास्ति, न च आमन्त्रणस्य आवश्यकता वर्तते।" सः विपक्षस्य नेतारं भाजपाविधायकान् च राजनैतिकमतभेदं त्यक्त्वा प्रभावितपरिवारैः सह स्थातुं आग्रहं कृतवान्।

## भाजपाशासनकाले विपक्षस्य विधायकानां वक्तुम् अनुमतिः नासीत्

मुख्यमन्त्री उक्तवान् यत् भाजपाशासने विपक्षस्य विधायकानां मञ्चे वक्तुम् अपि अनुमतिः नासीत्, यदा तु वर्तमानसर्वकारः प्रत्येकस्य दलस्य प्रतिनिधिनां सम्मानं करोति। उदाहरणम् उद्धृत्य सः अवदत् यत् अद्य भाजपाविधायकः अनिलशर्मा मञ्चे अस्ति, यत् सत्यलोकतन्त्रस्य चिह्नम् अस्ति।

## वयं पीडितानां दुःखम् अवगच्छामः

सुक्खुः अवदत् यत् तस्य सर्वकारेण प्रथमवारं फलोद्यानानां कृते १०० कोटिरूप्यकाणां सेबफलानि क्रीतानि, पशुपालकानां संबलार्थं च दुग्धस्य मूल्यं वर्धितम्। सः अवदत् यत् वयं व्यवस्थापरिवर्तनस्य सर्वकारः, यः पीडितानां दुःखं अवगच्छति। अस्माकं मन्त्रिणः आपदाकाले जेसीबीयन्त्रेषु उपविश्य आश्रयकार्यं कृतवन्तः।

## हिमकेयरयोजनायां पृष्ठद्वाराः पिहिताः अभवन्

चिकित्सालयेषु नूतनानि यन्त्राणि आनयन्ते, हिमकेयरयोजनायां "पृष्ठद्वाराः" पिहिताः च सन्ति। स आह- "अहं सत्तासुखाय अपि तु व्यवस्थापरिपर्तनाय राजनीतौ अस्मि" इति। "अहं परिवर्तनम् आनेतुं राजनीतिं प्रविष्टवान्। २०२७ तमे वर्षे मया सह तिष्ठतु। अहं वर्षद्वयेन हिमाचलं स्वनिर्भरं करिष्यामि, २०३२ तमे वर्षे च देशस्य समृद्धतमं राज्यं करिष्यामि।"

# मुख्यमंत्री पनारसा-महाविद्यालयस् भवनस्य उदघाटनं कृतवान्

### *महाविद्यालये अग्रिमे सत्रे बी. वॉक-बीसीए कक्षाः आरब्धाः भविष्यन्ति*



**हिमसंस्कृतवार्ताः- मण्डी।** मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः सोमवासरे मण्डीजनपदस्य पनारसायां १३.१४ रुप्यकाणां व्ययेन निर्मितस्य शासकीयमहाविद्यालयस्य भवनस्य उद्घाटनं कृतवान्। अस्मिन् अवसरे मुख्यमन्त्री उक्तवान् यत् राज्यसर्वकारस्य सर्वोच्चप्राथमिकतासु शिक्षा अन्यतमा अस्ति। सः अवदत् यत् शिक्षायां व्यवस्थितपरिवर्तनद्वारा गुणवत्तापूर्णशिक्षायाः प्रवर्धनार्थं सर्वकारः समन्वितप्रयत्नान् करोति। सः अपि अवदत् यत् नूतनानां संस्थानां उद्घाटनस्य उद्देश्यं केवलं भवननिर्माणं न भवेत्, अपितु छात्राणां कृते गुणवत्तापूर्णशिक्षायाः उपलब्धिः सुनिश्चिता भवेत्। वर्तमानराज्यसर्वकारः छात्राणां कृते पर्याप्तकर्मचारिणां व्यवस्थापनं सुनिश्चितं कुर्वन् अस्ति येन ते आत्मविश्वासं प्रवर्तयितुं शक्नुवन्ति, भविष्ये आह्वानानां सम्मुखीकरणं कर्तुं च शक्नुवन्ति। सः अवदत् यत् विगतत्रिषु वर्षेषु गुणवत्तापूर्णशिक्षाप्रदानार्थं सर्वकारेण अनेकानि परिष्कारात्मकानि पदानि स्वीकृतानि, येषां सकारात्मकं परिणामं प्राप्तम्। प्रथमश्रेणीतः १२ कक्षापर्यन्तं गुणवत्तापूर्णशिक्षाप्रदानार्थं पृथक् विद्यालयशिक्षानिदेशालयस्य स्थापना कृता। वर्तमानराज्यसर्वकारेण कृतानां परिष्कार- परिहाराणां कारणात् शिक्षाक्षेत्रे हिमाचलप्रदेशः २१ तः ५ स्थानं प्राप्तवान् अस्ति। सः अवदत् यत् प्रथमश्रेण्याः आरभ्य आङ्ग्लमाध्यमस्य प्रवर्तनं कृतम् अस्ति। १०० सीबीएसई विद्यालयाः निर्मिताः सन्ति, येषु ४० विद्यालयाः पूर्वमेव सम्बद्धाः सन्ति। अस्योद्देश्यं ग्राम्यक्षेत्रेषु बालकानां कृते गुणवत्तापूर्णशिक्षायाः उपलब्धिः सुनिश्चिता भवति। मुख्यमन्त्री उक्तवान् यत् सर्वकारेण महाविद्यालयस्तरस्य पृथक् निदेशालयः अपि निर्मितः अस्ति, सम्प्रति उच्चशिक्षायां च संरचनात्मकपरिवर्तनानि कार्यान्वितं भवति। सः अवदत् यत् कदाचित्, परिष्कारार्थं कठिननिर्णयाः कर्तव्याः भवन्ति, ये प्रथमे कठिनाः प्रतीयन्ते, परन्तु एते निर्णयाः जनहिताय एव सन्ति। सः अपि अवदत् यत् बालकानां भविष्याय सज्जीकरणाय सूचनाप्रौद्योगिकी-आधारितशिक्षा प्रदत्ता अस्ति।

# इदानीं पेन्शनभोगिनः स्वस्मार्टचलदूरभाषस्य उपयोगेन गृहात् एव स्वजीवनप्रमाणपत्रं दातुं शक्नुवन्ति



**हिमसंस्कृतवार्ताः- शिमला।** कार्मिक- लोकशिकायत- पेन्शन- मन्त्रालयस्य पेन्शन- एवं- पेन्शनभोक्तृ- कल्याण- विभागः नवम्बरमासस्य प्रथमदिनात् ३० दिनाङ्कपर्यन्तं राष्ट्रव्यापिनं डिजिटलजीवनप्रमाणपत्रं (DLC) अभियानं ४.० आयोजयिष्यति हिमाचलप्रदेशस्य ऊनायां नवम्बर ११ दिनाङ्के, काङ्गड़ायां च नवम्बर १२ दिनाङ्के जागरूकताशिबिराणाम् आयोजनं क्रियते। एतेषु शिविरेषु पेन्शनभोक्तृभ्यः डिजिटल- जीवनप्रमाणपत्रस्य (DLC) अभियानस्य विषये महत्त्वपूर्णसूचनाः प्रदास्यन्ते। ऊनायां भारतीय- स्टेट- वित्तकोषस्य मुख्यशाखायाः समीपस्थेषु च बैंकशाखासु प्रातः १०:०० वादने अभियानस्य आरम्भः भविष्यति। भारतीय स्टेट वित्तकोषस्य मुख्यशाखायां समीपस्थेषु वित्तकोषशाखासु च नवम्बर १२ दिनाङ्के काङ्गड़ामण्डलस्य पालमपुरे जागरूकता अभियानस्य ४.० आयोजनं भविष्यति। भारतसर्वकारस्य पेन्शन- एवं- पेंशनभोक्तृ- कल्याणविभागस्य अवरसचिवः सुभाषचन्द्रः पालमपुरे शिबिरे उपस्थितः भविष्यति यत् राष्ट्रव्यापिनः डिजिटल- जीवनप्रमाणपत्र- अभियानस्य 4.0 इत्यस्य भागरूपेण मुखपरिचयद्वारा डीएलसी- प्रस्तुयमानैः पेन्शनभोक्तृभिः सह संवादं कर्तुं तथा च डोर- टू- डोर- डीएलसी-सेवानां शिविराणां च निरीक्षणं करिष्यति। सुभाषचन्द्रः एसबीआई, इण्डिया डाकभुगतानबैङ्क (डाकविभाग), यूआईडीएआई, एनआईसी, तथा च स्थानीय- पेंशन- भोगक- कल्याणसङ्घयोः मध्ये समन्वयस्य समीक्षां करिष्यति येन शिविरानाम् सुचारुरूपेण संचालनं सुनिश्चितं भवति। डिजिटल इण्डिया तथा सहजजीवनमिशनयोः अनुरूपं पेन्शनभोक्तृणां डिजिटलसशक्तिकरणस्य सर्वकारस्य दृष्ट्या अयं अभियानः प्रमुखः उपक्रमः अस्ति। DLC अभियान 4.0 इत्यस्य उद्देश्यं संतृप्ति- आधारित- प्रसारपद्धत्या 2,000तः अधिकेषु नगरेषु उपनगरेषु च 20 मिलियन-पेन्शनभोक्तृभ्यः सम्पर्कं कर्तुं वर्तते। आधाराधारित- मुखप्रमाणीकरण- प्रौद्योगिक्याः उपयोगे अस्मिन् अभियाने बलं दत्तं भविष्यति, येन पेन्शनभोक्तृणां बायोमेट्रिकयन्त्राणां उपरि अवलम्बनस्य आवश्यकता न भवति तथा च तेषां स्मार्टचलदूरभाषस्य उपयोगेन स्वगृहात् एव स्वजीवनप्रमाणपत्राणि सुविधानुसारं प्रस्तूयन्ते। इण्डिया पोस्ट पेमेंट्स बैंकस्य द्वारे डीएलसी सेवायाः माध्यमेन अत्यन्तं वरिष्ठानां विकलाङ्गानां पेन्शनधारकाणां विषये विशेषं ध्यानं दीयते। प्रधानमन्त्री नरेन्द्रमोदी, नवम्बर २४, २०२४ दिनाङ्के "मनोगतम्" इत्यस्य सम्बोधने, २६ नवम्बर २०२४ दिनाङ्के संविधानदिवसस्य सम्बोधने च बोधयति यत् डिजिटलप्रमाणपत्रादिभिः नवीनैः डिजिटल इण्डिया-उपक्रमैः देशे सर्वत्र वरिष्ठनागरिकाणां कृते पेन्शनप्रक्रिया सरलीकृता भवति। देशस्य दूरस्थक्षेत्रेषु निवसतां पेन्शनभोक्तृणां डिजिटलरूपेण समावेशस्य उद्देश्यं कृत्वा एतत् अभियानं सर्वेषां प्रमुखहितधारकाणां सहकार्यं कृत्वा कार्यान्वितं भविष्यतिः वित्तकोषाः, इण्डिया पोस्ट पेमेंट्स बैंक, यूआईडीएआई, इलेक्ट्रॉनिक्स, सूचनाप्रौद्योगिकीमन्त्रालयः, एन. आई. सी. , सी. जी. डी. ए., रेलवे, स्थानीयपेंशनभोगी कल्याणसङ्घः।

# शक्तावाग्विलासस्य समीक्षात्मकाध्ययनम्

कविः डॉ. कीर्तिवल्लभशक्तामहाभागाः काव्यस्यारम्भे विघ्नविनाशकङ्गणपतिं प्रार्थयति। स मन्यते यत्, श्रीगणेशः सर्वविद्याः सर्वसिद्धीः सर्वकलाः चाधिष्ठाय स्थितः। तस्य कृपयैव काव्यस्य शुभारम्भः निर्बाधं भवति। गणेशः सर्वेषां कार्याणां मूलाधारः स एव चित्तस्य स्थैर्यं बुद्धेः प्रसादं वाक्यस्य माधुर्यं च ददाति। कविस्तमवलम्ब्य प्रार्थयते हे विनायक! त्वमेव भक्तानां विघ्ननाशकः मार्गदर्शकः तथा ज्ञानदीपः। त्वदनुग्रहेण मम काव्यं सफलं भूयात्। एवं कविः गणेशस्य शुद्धप्रज्ञां शान्तस्वभावं चन्द्रकलाधरं रूपं च चिन्तयन् आत्मनः काव्ययात्रायाः मङ्गलं करोति। श्रीगणेशानन्तरं कविः सरस्वतीं नमति। सा वाणीबुद्धिज्ञानकाव्य सङ्गीतादीनामधिष्ठात्री देवी। कविस्तां वन्दते यत् हे शारदे मम जिह्वायां निवस। मम वाक्यं त्वयि प्रसन्नेऽमृतसमानं भूयात्। कविः वर्णयति यत् देवी शारदा श्वेतवर्णा शुक्लवसना कमलासनस्था वीणापुस्तकधारिणी च। तस्यां स्थितं ज्ञानं निर्मलं यत्तमोमयमज्ञानं तन्निवारयति। देवी सरस्वती काव्यस्यात्मा इव दृश्यते। यत् तया प्रेरितं वाक्यं तदेव सत्यं, मधुरं, चिरस्थायि च भवति। अतः कविः प्रार्थयति हे वाग्देवि मम हृदये सदैव वासं कुरु। मम चिन्तनानि शुद्धानि स्युः, मम शब्दाः शुभार्थदाः स्युः। "शक्तावाग्विलासः"इत्ययं काव्यग्रन्थः आधुनिकसंस्कृतसाहित्येऽद्भुतं रत्नमिव शोभते। अस्य कविना भारते मातृभूमेः दैवीस्वरूपं दिव्यदृष्ट्या अवलोक्य तस्याः नानारूपाणि शक्तिपीठानि तीर्थानि नगराणि चामृतमयैः शब्दैर्वर्णितानि। काव्ये राष्ट्रभावना भक्तिरसः दार्शनिकदृष्टिः च त्रीणि तत्त्वानि स्तम्भरूपेण प्रतिष्ठितानि। कविः केवलं श्लोकानां रचनां न कृतवान् किन्तु तेषु भारतस्यात्मानं शक्तेः चासीमं वैभवं स्थापयामास। अत्र देवी न केवलं पूजा-अर्चनायाः विषयोऽपितु सर्वव्यापकं ब्रह्मस्वरूपं यत् पर्वते नद्यां भूमौ मनुष्ये च व्याप्नोति। एवं काव्यम् "अद्वैतशाक्तदर्शनस्य" साक्षात् प्रतिपादनम्। शब्दशिल्पे कविरद्भुतं कौशलं प्रदर्शयति। छन्दःसु-अनुप्रासः रूपकं उपमा इत्यादयः काव्यालङ्काराः स्वाभाविकरूपेण प्रवहन्ति। प्रत्येकं श्लोको ललितो गम्भीरो भावसमृद्धश्च। काव्यस्यान्ते "भारतधरावन्दनम्" नाम प्रकरणं तु हृदयस्पर्शकमस्ति। तत्र कविः सम्पूर्णं राष्ट्रं मातृस्वरूपेण प्रणम्य भारते शक्तेः साक्षात्कारं दर्शयति। अयं भागः काव्यस्यात्मेव यो राष्ट्रभक्तेरध्यात्मपर्यवसानं प्रतिपादयति। अतोऽस्य काव्यस्य विशेषता एषा यत् एतत् भक्ति-दर्शन- राष्ट्रप्रेम-साहित्यकौशलानान्तथा संस्कृतवैभवस्याऽद्वितीयं सङ्गमस्थानमस्ति। अहं ममेष्टदेवम् श्रीसद्देवबालकामेश्वरं प्रति प्रार्थये यत् "शक्तावाग्विलासः" इदं काव्यरत्नं स्रोतःसाहित्यस्येतिहास उत्कृष्टस्थानं प्राप्नुयात्। एतत् काव्यं कविश्रेष्ठस्य भावनाभक्तिबुद्धिप्रेरणानां संगमसङ्गतमिव विराजमानम्। इदं काव्यं पाठकानां हृदयेषु स्थायित्वं लभेत् तेषां कण्ठे नित्यं गीयमानं भूयात्।



वत्स-देशराज-शर्मा
संस्थापकाध्य वैदिकगणः भारतम

# शोकवार्ता

## कालो ह्यत्यन्तं निष्ठुरः

उत्तरप्रदेशराज्यस्य पूर्वः अपरमुख्यसचिवः तथा उत्तरप्रदेशसंस्कृतसंस्थानस्य पूर्वकार्यकारि-अध्यक्षः आइएएस जितेन्द्रकुमाराभिधेयो वरिष्ठप्रशासकः दिवंगतः अभवत्। ह्यः उत्तरप्रदेश- स्नातकोत्तर- आयुर्विज्ञानसंस्थाने अन्तिमश्वासं निःश्वासितवान्। सः अस्य वर्षस्य जूनमासे सेवानिवृत्तः आसीत्।

भाषाविभागे तेन अपरमुख्यसचिवरूपेण कार्यं कुर्वता उत्तरप्रदेशसंस्कृतसंस्थानाय नूतनं भवनं दापितम्। संस्कृतविकासाय तेन विविधाः योजनाः आरब्धाः समर्थिताश्च, यथा– सरलसंस्कृत- संभाषण- शिविरयोजना, जिला- शिक्षा- प्रशिक्षण- संस्थानानां संस्कृत-वाग्व्यवहार- कार्यशाला, प्रौद्योगिकी-संस्कृताभिमुखीकरणम्, शिक्षण- प्रशिक्षणकार्यशाला, संगणकेन संस्कृतशिक्षणम्, ऑनलाइनप्रशिक्षणं पाठ्यक्रमनिर्माणयोजना, गृहे गृहे संस्कृतमिति च। संस्कृतप्रतिभाखोजयोजना तथा संस्कृताध्ययन-प्रोत्साहनवृत्तियोजना इत्येतयोः योजनयोः स एव अध्यक्षरूपेण प्रमुखं योगदानं दत्तवान्।

तदीयं कथनं यत् "संस्कृतस्य विकासाय संस्कृतज्ञाः यत् कुर्वन्ति, तत् एकः IAS अधिकारी दृढीकुर्यात्, अतः कर्तव्यमेव संस्कृतज्ञैरेव।"

तदीयप्रेरणया यत् संस्थानेन विचिन्तितं यत् कार्यं मूर्तरूपं प्राप्नोत्। तस्य निधनं अत्यन्तं मर्मस्पर्शि दुःखदं च। ईश्वरः तं दिवङ्गतात्मानम् अनुगृह्य शान्तिं ददातु इति प्रार्थयामहे।

**शोकसंतप्तः-प्रशिक्षकः सत्यममिश्रः,**
**उत्तरप्रदेशसंस्कृतसंस्थानम्,लखनऊउत्तरप्रदेश**

# अन्तर्राष्ट्रीयश्रीरेणुकाजीमेलापके प्रवर्तिता नूतना परम्परा



**हिमसंस्कृतवार्ताः।** अन्तर्राष्ट्रीयश्रीरेणुकाजीमेला हिमाचलप्रदेशस्य प्राचीनमेलापकेषु अन्यतमः अस्ति । मातृपुत्रयोः पवित्रसमागमस्य उत्सवस्य अयं श्री रेणुकाजी मेलापकः कार्तिकमासस्य शुक्लपक्षस्य दशमदिनात् पूर्णिमादिनपर्यन्तं प्रतिवर्षं श्री रेणुकाजी प्रसिद्धे तीर्थस्थले आचर्यते। मन्दिरस्य पुरोहितस्य रमेश कपिलमहोदयस्य मते अस्मिन् दिने भगवान् परशुरामः स्वमातुः रेणुकाजीं मिलितुं जमुकोटीतः आगच्छति। अयमुत्सवः मातुःरेणुकायाः मातृप्रेमस्य पुत्रभक्तेः च अद्वितीयः संगमः अस्ति, यः असंख्यजनानाम् अचलविश्वासस्य च प्रतीकः अस्ति । उत्तरभारतस्य प्रसिद्धं धार्मिकपर्यटनस्थलम् इति अपि प्रसिद्धम् अस्ति । अत्र स्त्रीशरीरसदृशं प्राकृतिकं सरोवरं मातुः रेणुकाजीप्रतिबिम्बं मन्यते । अस्य सरोवरस्य एकस्मिन् तटे रेणुकाजी-मातुः, परशुरामजी-भगवतः च भव्यं मन्दिरं विद्यते । मातृपुत्रयोः अस्य पवित्रमिलनावसरे श्री रेणुकाजी मेला आरभ्यते।

## मेलापके प्रवर्तिता नूतना परम्परा

अस्मिन् वर्षे अस्मिन् मेलापके नूतना परम्परा प्रवर्तिता । श्री रेणुकाविकासबोर्डेन भगवतः परशुरामस्य माँ रेणुकायाः च कृते सायंकाले आरती कृता, यथा माँ गंगायाः कृते भवति। अनेन समुदायस्य अविचलश्रद्धा भक्तिः च प्रदर्शिता । अस्मिन् अवसरे प्रशासनेन आरत्याः कृते भक्तेभ्यः प्रतिदिनं प्रायः ५०० तः ६०० यावत् शुद्धघृतदीपाः निःशुल्काः वितरिताः । जनाः प्रायः १०० किलोग्रामं शुद्धघृतं दानं कृतवन्तः ।

प्रतिदिनं सायं ६ वादने आरब्धा एषा आरती सर्वैः सामाजिकसमूहैः, संस्थाभिः, विविधैः समूहैः, अधिकारिभिः च प्रशंसिता । माननीय राज्यपालः शिवप्रतापशुक्लमहोदयः उपमुख्यमन्त्री मुकेश अग्निहोत्रीमहोदयः, सर्वैः आदरणीयजनप्रतिनिधिभिः च एतत् आरती नित्यं करणीयम् इति परामर्शः दत्तः।

## नाहनसंस्कृतमहाविद्यालयेन कृतम् आरत्याः संचालनम्

नाहनसंस्कृतमहाविद्यालयस्य ज्योतिषविषयस्य सहायकार्यः डॉ.ज्ञानेश्वरशर्मा उक्तवान् यत् अस्माकं महत् सौभाग्यं यत् प्रशासनेन नाहन-नगरस्य सर्वकारीयसंस्कृतमहाविद्यालयाय एतस्याः आरत्याः संचालनस्य अवसरः प्रदत्तः । एतां आरतीं सम्पादयितुं पूर्णं श्रेयः श्री रेणुकाजी विकास बोर्डस्य सचिवाय, उपमण्डलाधिकारी नाहनः, श्री राजीव सांख्यायन इत्यस्मै किञ्च जिला उपायुक्ता श्रीमती प्रियंका वर्मा सहितं अन्येभ्यः सर्वेभ्यः प्रशासनिकाधिकारिभ्यः गच्छति।



हिमसंस्कृतवार्ताः , ईदरधीरजः,हैदराबादः

# वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने 'अध्येता' इत्यस्य वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।

**काव्या-** नमस्ते नन्दिनि। राष्ट्रियस्वयंसेवकसङ्घस्य प्रमुखः मोहनभागवतः उक्तवान् अस्ति यत् हानिः एव इस्लामाबादं पाठयिष्यन्ति यत् सहयोगः एव वरम् इति। कठोरं वचनम् इदम्।

**नन्दिनी-** सत्यम्, इदं वचनं गभीरम्। इदानीम् अपरा वार्ता। पञ्जाबस्य आम-आदमी-पक्षस्य विधायकः बलात्कारेण आरोपितः सन् आस्ट्रेलियादेशं प्रति पलायितवान् अस्ति। सः एतत् 'राजनीयं षड्यन्त्रम्' इति कथितवान् अस्ति।

**काव्या-** राजनेतुः पलायनं तु अतीव गम्भीरः विषयः। इदानीम् अपरा वार्ता श्रूयताम्। बेङ्गलूरु- केन्द्रीय-कारागारस्य बन्दिनः मदिरां, अल्पाहारं, दूरवाणीं च स्वीकृत्य उत्सवं नृत्यं च कृतवन्तः सन्ति। ते राजानः इव जीवनं यापितवन्तः सन्ति।

**नन्दिनी-** कारागारे एतादृशी घटना आश्चर्यजनका एव। इदानीम् अन्तिमा वार्ता। जम्मू-काश्मीरस्य कठुआ-नगरे द्वौ विशेष-आरक्षक-अधिकारिणौ आतङ्कवादि-सम्बन्धानां कारणात् पदात् निष्कासितवन्तौ स्तः।

**काव्या-** आरक्षकाणाम् एव आतङ्कवादिभिः सह सम्बन्धः इति तु देशस्य सुरक्षायै महती चिन्ता। अस्तु, अद्य एतावदेव। श्वः पुनर्मिलिष्यामः। धन्यवादः।